# ॥ श्रीचिदम्बरेश्वर स्तोत्रम् ॥

**|| śrīcidambareśvara stotram ||**

कृपासमुद्रं सुमुखं त्रिणेत्रं

जटधरं पार्वतिवामभागम् ।

सदाशिवं रुद्रमनन्तरूपं

चिदम्बरेशं हृदि भावयामि ॥ १ ॥

kṛpāsamudraṁ sumukhaṁ triṇetraṁ

jaṭadharaṁ pārvativāmabhāgam |

sadāśivaṁ rudramanantarūpaṁ

cidambareśaṁ hṛdi bhāvayāmi || 1 ||

वाचामतीतं फणिभूषिताङ्गं

गणेशतातं धनदस्य मित्रम् ।

कन्दर्पनाशं कमलोत्पलाक्षं

चिदम्बरेशं हृदि भावयामि ॥ २ ॥

vācāmatītaṁ phaṇibhūṣitāṅgaṁ

gaṇeśatātaṁ dhanadasya mitram |

kandarpanāśaṁ kamalotpalākṣaṁ

cidambareśaṁ hṛdi bhāvayāmi || 2 ||

रमेशवन्द्यं रजताद्रिनाथं

श्रीवामदेवं भवदुःखनाशम् ।

रक्षाकरं राक्षसपीडितानां

चिदम्बरेशं हृदि भावयामि ॥ ३ ॥

rameśavandyaṁ rajatādrināthaṁ

śrīvāmadevaṁ bhavaduḥkhanāśam |

rakṣākaraṁ rākṣasapīḍitānāṁ

cidambareśaṁ hṛdi bhāvayāmi || 3 ||

देवाधिदेवं जगदेकनाथं

देवेशवन्द्यं शशिगन्धचूडम् ।

गौरीसमेतं कृतविघ्नदक्षं

चिदम्बरेशं हृदि भावयामि ॥ ४ ॥

devādhidevaṁ jagadekanāthaṁ

deveśavandyaṁ śaśigandhacūḍam |

gaurīsametaṁ kṛtavighnadakṣaṁ

cidambareśaṁ hṛdi bhāvayāmi || 4 ||

वेदान्तवेद्यं सुरवैरिविघ्नं

शुभप्रदं भक्तिमदन्तराणाम् ।

कालान्तकं श्रीकरुणाकटाक्षं

चिदम्बरेशं हृदि भावयामि ॥ ५ ॥

vedāntavedyaṁ suravairivighnaṁ

śubhapradaṁ bhaktimadantarāṇām |

kālāntakaṁ śrīkaruṇākaṭākṣaṁ

cidambareśaṁ hṛdi bhāvayāmi || 5 ||

हेमाद्रिचापं त्रिगुणात्मभावं

गुहात्मजं व्याघ्रपुरीशमाद्यम् ।

स्मशानवासं वृषवाहनाथं

चिदम्बरेशं हृदि भावयामि ॥ ६ ॥

hemādricāpaṁ triguṇātmabhāvaṁ

guhātmajaṁ vyāghrapurīśamādyam |

smaśānavāsaṁ vṛṣavāhanāthaṁ

cidambareśaṁ hṛdi bhāvayāmi || 6 ||

आद्यन्तशून्यं त्रिपुरारिमीशं

नन्दीशमुख्यस्तुतिवैभवाद्यम् ।

समस्तदेवैः परिपूजितांघ्रिं

चिदम्बरेशं हृदि भावयामि ॥ ७ ॥

ādyantaśūnyaṁ tripurārimīśaṁ

nandīśamukhyastutivaibhavādyam |

samastadevaiḥ paripūjitāṅghriṁ

cidambareśaṁ hṛdi bhāvayāmi || 7 ||

तमेव भान्तं ह्यनुभूतिसर्वं

अनेकरूपं परमार्थमेकम् ।

पिनाकपाणिं भवनाशहेतुं

चिदम्बरेशं हृदि भावयामि ॥ ८ ॥

tameva bhāntaṁ hyanubhūtisarvaṁ

anekarūpaṁ paramārthamekam |

pinākapāṇiṁ bhavanāśahetuṁ

cidambareśaṁ hṛdi bhāvayāmi || 8 ||

विश्वेश्वरं नित्यमनन्तमाद्यं

त्रिलोचनं चन्द्रकलावतम्सम् ।

पतिं पशूनां हृदि सन्निविष्टं

चिदम्बरेशं हृदि भावयामि ॥ ९ ॥

viśveśvaraṁ nityamanantamādyaṁ

trilocanaṁ candrakalāvatamsam |

patiṁ paśūnāṁ hṛdi sanniviṣṭaṁ

cidambareśaṁ hṛdi bhāvayāmi || 9 ||

विश्वाधिकं विष्णुमुखैरुपास्यं

त्रिलोचनं पञ्चमुखं प्रसन्नम् ।

उमापतिं पापहरं प्रशान्तं

चिदम्बरेशं हृदि भावयामि ॥ १० ॥

viśvādhikaṁ viṣṇumukhairupāsyaṁ

trilocanaṁ pañcamukhaṁ prasannam |

umāpatiṁ pāpaharaṁ praśāntaṁ

cidambareśaṁ hṛdi bhāvayāmi || 10 ||

कर्पूरगात्रं कमनीयनेत्रं

कंसारिमित्रं कमलेन्दुवक्त्रम् ।

कन्दर्पगात्रं कमलेशमित्रं

चिदम्बरेशं हृदि भावयामि ॥ ११ ॥

karpūragātraṁ kamanīyanetraṁ

kaṁsārimitraṁ kamalenduvaktram ।

kandarpagātraṁ kamaleśamitraṁ

cidambareśaṁ hṛdi bhāvayāmi ।। 11 ।।

विशालनेत्रं परिपूर्णगात्रं

गौरीकलत्रं हरिदम्बरेशम् ।

कुबेरमित्रं जगतः पवित्रं

चिदम्बरेशं हृदि भावयामि ॥ १२ ॥

viśālanetraṁ paripūrṇagātraṁ

gaurīkalatraṁ haridambareśam ।

kuberamitraṁ jagataḥ pavitraṁ

cidambareśaṁ hṛdi bhāvayāmi ।। 12 ।।

कल्याणमूर्तिं कनकाद्रिचापं

कान्तासमाक्रान्त निजार्धदेहम् ।

कपर्दिनं कामरिपुं पुरारिं

चिदम्बरेशं हृदि भावयामि ॥ १३ ॥

kalyāṇamūrtiṁ kanakādricāpaṁ

kāntāsamākrānta nijārdhadeham |

kapardinaṁ kāmaripuṁ purāriṁ

cidambareśaṁ hṛdi bhāvayāmi || 13 ||

कल्पान्तकालाहित चण्डनृत्तं

समस्तवेदान्त वचो निगूढम् ।

अयुग्मनेत्रं गिरिजासहायं

चिदम्बरेशं हृदि भावयामि ॥ १४ ॥

kalpāntakālāhita caṇḍanṛttaṁ

samastavedānta vaco nigūḍham |

ayugmanetraṁ girijāsahāyaṁ

cidambareśaṁ hṛdi bhāvayāmi || 14 ||

दिगम्बरं शङ्खसिताल्पहासं

कपालिनं शूलिनमप्रमेयम् ।

नगात्मजा वक्त्रपयोजसूर्यं

चिदम्बरेशं हृदि भावयामि ॥ १५ ॥

digambaraṁ śaṅkhasitālpahāsaṁ

kapālinaṁ śūlinamaprameyam |

nagātmajā vaktrapayojasūryaṁ

cidambareśaṁ hṛdi bhāvayāmi || 15 ||

सदाशिवं सत्पुरुषैरनेकैः

सदार्चितं सामशिरस्सुगीतम् ।

वैयाघ्रचर्माम्बरमुग्रमीशं

चिदम्बरेशं हृदि भावयामि ॥ १६ ॥

sadāśivaṁ satpuruṣairanekaiḥ

sadārcitaṁ sāmaśirassugītam |

vaiyāghracarmāmbaramugramīśaṁ

cidambareśaṁ hṛdi bhāvayāmi || 16 ||

चिदम्बरेशस्य स्तवं पठेद्यः

प्रदोषकालेषु पुमान् स धन्यः ।

भोगानशेषाननुभूय भूयः

सायुज्यमप्येति चिदम्बरस्य ॥

cidambareśasya stavaṁ paṭhedyaḥ

pradoṣakāleṣu pumān sa dhanyaḥ |

bhogānaśeṣānanubhūya bhūyaḥ

sāyujyamapyeti cidambarasya ||

॥ इति शिवम् ॥

|| iti śivam ||

www.kamakotimandali.com